**Laghusiddhāntakaumudī / Oṁ śrīRagunāthajī sahā // Oṁ Sarasvatīprakāśajamvū mai // *.**

**Contributors**

Varadarāja, active 17th century.

**Publication/Creation**

[India], 1850-1900.

**Persistent URL**

https://wellcomecollection.org/works/utqtgx99


**License and attribution**

This work has been identified as being free of known restrictions under copyright law, including all related and neighbouring rights and is being made available under the Creative Commons, Public Domain Mark.

You can copy, modify, distribute and perform the work, even for commercial purposes, without asking permission.

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org

ॐ श्रीरघुनाथजी सहाय ॥ ॐ सरस्वतीप्रकाशजम्हैसै ॥ ❀ ॥

ॐ स्वस्ति श्री गणेशाय नमः ॐ गुरवे नमः ॐ परमगुरवे नमः ॥ ॐ नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहं ॥ पाणिनीयप्रवे-
ॐ शाय लघुसिद्धान्तकौमुदीम् ॥१॥ अइउण् ऋऌक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश्
खफछठथचटतव् कपय् शषसर् हल् ॥१४॥ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि एषामन्त्या इतः हकारादिष्वका-
र उच्चारणार्थः लण्मध्ये त्वित्संज्ञकः हलन्त्यम् उपदेशेऽन्त्यं हलित्स्यात् उपदेश आद्योच्चारणं सूत्रेष्वदृष्टं पदं सूत्रान्तरादनु-
वर्तनीयं सर्वत्र अदर्शनं लोपः प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् तस्य लोपः तस्येतो लोपः स्यात् णादयोणाद्यर्थाः आदि-
रन्त्येन सहेता अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् यथाण् इति अइउवर्णानां संज्ञा एवमच् हल् अल् इत्या-
दयः ऊकालोऽज्झ्रस्वदीर्घप्लुतः उश्च ऊश्च ऊ३श्च वः वां कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् स च प्रत्ये-
कमुदात्तादिभेदेन त्रिधा उच्चैरुदात्तः ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् नीचैरनुदात्तः
७ ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् समाहारः स्वरितः उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रिय-
ते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा मुखनासिकावचनोऽनुनासि-
कः मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् तदित्थं अइउऋ एषां प्रत्येकमष्टादश भेदाः ऌवर्णस्य
द्वादश तस्य दीर्घाभावात् एचामपि द्वादश तेषां ह्रस्वाभावात् तुल्यास्यप्रयत्नं सवर्णं ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च
त्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यं अकुहविसर्जनीयानां कण्ठः
इचुयशानां तालु ऋटुरषाणां मूर्द्धा ऌतुलसानां दन्ताः उपूपध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः
कण्ठतालु ओदौतोः कण्ठोष्ठं वकारस्य दन्तोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्य अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्त-
थाजिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च हकारं पंचमैर्युक्तमन्तस्थाभिश्च संयुतं उरस्यं तं विजानीयात् कण्ठ्यमा-
हुरसंयुतं प्रयत्नो द्विधा आभ्यन्तरो बाह्यश्च आद्यः पञ्चधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् तत्र स्पृष्टं प्रयतनं स्प-
र्शानां ईषत्स्पृष्टमन्तस्थानां ईषद्विवृतमूष्मणां विवृतं स्वराणां ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृत-
मेव बाह्यप्रयत्नस्त्वेकादशधा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति

^जिह्वामूलीयस्य

लकारोऽपि

ॐ लं कौ० २

खरो विवाराः श्वासा अघोषाश्च॥ हशः संवारा नादा घोषाश्च॥ वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः वर्गाणां द्वितीयचतुर्थौ श-
लश्च महाप्राणाः कादयो मावसानाः स्पर्शाः यणोऽन्तःस्थाः शल ऊष्माणः अचः स्वराः ≍क ≍ख इति कखाभ्यां प्रागर्द्धविसर्गसदृ-
शो जिह्वामूलीयः ≍प ≍फ इति पफाभ्यां प्रागर्द्धविसर्गसदृश उपध्मानीयः अं अः इत्यचः परावनुस्वारविसर्गौ॥ अणुदित्सवर्णस्य
चाप्रत्ययः॥१।१।६९॥ अवधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात्॥ अत्रैवाण् परेण णकारेण बोध्यः॥ कु चु टु तु पु एते॥
उदितः॥ तदेवम् अ इत्यष्टादशानां संज्ञा स्यात् तथेकारोकारौ ऋकारस्त्रिंशतः। एवं अनुनासिकाननुनासिकभेदेन यवला द्विधा
तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा॥ परः सन्निकर्षः संहिता॥१।४।१०९॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञः
स्यात्॥ हलोऽनन्तराः संयोगः॥१।१।७॥ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः॥ सुप्तिङन्तं पदम्॥१।४।१४॥ सुबन्तं तिङन्तं
च पदसंज्ञं स्यात्॥ इति संज्ञाप्रकरणम्॥ इको यणचि॥६।१।७७॥ इकः स्थाने यण् स्यादचि संहितायां विषये॥ सुधी उपास्य इ-
ति स्थिते॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥१।१।६६॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्य-
॥ स्थानेऽन्तरतमः॥१।१।५०॥ प्रसङ्गे सति सदृशतम आदेशः स्यात् सुध्य् उपास्य इति स्थिते। अनचि च॥८।४।४७॥ अचः परस्य
यरो द्वे वा स्तो न त्वचि। झलां जश् झशि इति पूर्वधकारस्य दकारः संयोगान्तस्य लोपः॥८।२।२३॥ संयोगान्तं यत्पदं तदन्तस्य लो-
पः स्यात्॥ अलोऽन्त्यस्य॥१।१।५२॥ षष्ठीनिर्दिष्टोऽन्त्यस्यादेशः स्यात् इति यलोपे प्राप्ते॥ यणः प्रतिषेधो वाच्यः। अजन्तेन पूर्वेण
संयोगम्। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रंशः। लाकृतिः। अचो रहाभ्यां द्वे॥८।४।४६॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा
स्तः हर्य्यनुभवः नह्य्यस्ति। एचोऽयवायावः॥६।१।७८॥ एचः क्रमात् अय् अव् आय् आव् एते स्युरचि॥ यथासंख्यमनुदेशः समा- नाः
नाम्॥१।३।१०॥ समसंबंधी विधिर्यथासंख्यं स्यात्। हरये विष्णवे नायकः पावकः॥ वान्तो यि प्रत्यये॥६।१।७९॥ यकारादौ प्रत्य-
ये परे ओदौतोरवावौ स्तः गव्यम् नाव्यम्॥ क्षय्यजय्यौ शक्यार्थे॥६।१।८१॥ योतादेशनिपातनार्थमिदं। क्षय्यम् जय्यम्। शक्यार्थे किं
क्षेयं जेयं क्षेयं पापं जेयं मनः॥ अध्वपरिमाणे च॥ गोशब्दस्य यूतिशब्दे परे अध्वपरिमाणे वाच्ये अवादेशः स्यात् गव्यूतिः॥ गोर्यूतौ
छन्दस्युपसंख्यानम्। क्रोशयुगं॥ अदेङ् गुणः॥१।१।२॥ अदेङ् च गुणसंज्ञः स्यात्॥ तपरस्तत्कालस्य॥१।१।७०॥ तपरो वर्णस्तात्परो वा उच्चार्यमाणव-
र्णः समकालस्यैव संज्ञा स्यात्। एकः पूर्वपरयोः॥६।१।८४॥ इत्यधिकृत्य॥ आद्गुणः॥६।१।८७॥ अवर्णादचि परे पूर्वपरयोरेको

गव्यूतित्री

अवर्णात्परयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे॥ सर्वत्रास्तिदृम्॥ ३

व

शएलादेशः स्यात्संहितायां विषये। उपेंद्रः। गंगोदकं। रमेशः॥ उपदेशेऽजनुनासिक इत्॥१।३।२॥ उपदेशेऽनुनासिकोऽजित्संज्ञः स्या-
त्। प्रतिज्ञानुनासिक्याः पाणिनीयाः॥ लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥ उरण् रपरः॥१।१।५१॥ ऋ इति त्रिंशतः
संज्ञेत्युक्तं तस्मिन्नेव स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः। तवल्कारः। लोपः शाकल्यस्य॥८।३।१९॥ पूर्वत्रासिद्धम्॥ सपादसप्ताध्या-
यीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्॥ हर इह॥ हरयिह॥ विष्णविह॥ विष्णविह॥ वृद्धिरादैच्॥१।
१।१॥ आदैच्च वृद्धिसंज्ञः स्यात्॥ वृद्धिरेचि॥६।१।८८॥ आदेचि परे वृद्धिरेकादेशः स्यात्॥ गुणापवादः॥ कृष्णैकत्वं। गंगौघः। दे-

वैश्वर्यं। कृष्णौत्कण्ठ्यम्॥ एत्येधत्यूठ्सु॥६।१।८९॥ अवर्णादेजाद्योरेत्येधत्योरूठि च परे पूर्वपरयोर्वृद्धिरेकादेशः स्यात् पररू-
पगुणापवादः॥ उपैति। उपैधते॥ प्रष्ठौहः। एजाद्योः किं। उपेतः॥ मा भवान्प्रेदिधत् अक्षादूहिन्यामुपसंख्यानं। अक्षौहिणी
सेना। स्वादीरेरिणोः॥ स्वैरं स्वैरी स्वैरिणी। प्राद्दोढोढ्यैषैष्येषु। प्रौढः। प्रौढिः। प्रैषः प्रैष्यः। ऋते च तृतीयासमासे। अव-
र्णात् ऋते परे तृतीयासमासे वाच्ये वृद्धिरेकादेशः स्यात्। सुखेन ऋतः सुखार्तः। तृतीयेति किं परमर्तः। प्रवत्सतरकम्बलवस- २
नार्णदशानामृणे। प्रार्णं वत्सतरार्णं कम्बलार्णं वसनार्णं दशार्णं॥ उपसर्गाः क्रियायोगे। प्रादयः क्रियायोगे उपसर्गसंज्ञाः
स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप॥ चादयोऽसत्त्वे। प्रा-
दयोऽधातवः॥१।४।५८॥ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। उपसर्गादृति धातौ॥ अवर्णान्तादुपसर्गादृकारादौ धातौ परे
वृद्धिरेकादेशः स्यात्। प्रार्छति। उपार्छति। एङि पररूपम्॥६।१।९४॥ आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपो-
षति। अचोऽन्त्यादि टि॥१।१।६४॥ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम्। तच्च टेः। शकन्धुः। कर्कन्धुः। म-
नीषा। पतञ्जलिः। सीमन्तः केशवेशे। सीमान्तोऽन्यः। सारङ्गः पशुपक्षिणोः। सारङ्गोऽन्यः। आकृतिगणोऽयम्। एवे चानियोगे। अवर्णादेव-
शब्दे परे पररूपमेकादेशः स्यात्। अनियोगे अवधारणाभावे। क्वेव भोक्ष्यसे। अनियोगे किं। तवैव। ओत्वोष्ठयोः समासे वा। स्थूलोतुः स्थूलौतुः। बिम्बोष्ठः
बिम्बौष्ठः। समासे किं। तवौष्ठः। ओमाङोश्च। अवर्णान्तादोमि आङि च परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि शिवेहि। अकः सवर्णे दीर्घः।
अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतॄकारः। एङः पदान्तादति। पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णो-
ऽव। सर्वत्र विभाषा गोः। लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गोअग्रं गोऽग्रं। एङन्तस्य किं। चित्रग्वग्रं। पदान्ते किं। गोः। अनेकाल्शित्सर्वस्य। अनेकाल्-
देशः शिच्च सर्वस्य स्थाने स्यात्। इति प्राप्ते। ङिच्च। ङिदनेकालप्यन्तस्यैव स्यात्। अवङ् स्फोटायनस्य॥ ४

दा

ह्रे

ऊँ· ल·कौ २

पदान्ते पद.तस्य गोरवङ्वा स्यादचि गवाग्रं गोऽग्रं गोग्रं पदान्ते किं गवि इन्द्रे च गोरवङ् स्यादिन्द्रे गवेन्द्रः ॥ यवाश्रित विभाषया ।
गवाक्षः दूराद्धूते च ३ वाक्यस्य टेः प्लुतो वा स्यात् प्लुतप्रगृह्या अचि नित्यम् १ एते अचि प्रकृत्या स्युः आगच्छ कृष्ण
३ अत्र गौश्चरति ह्रस्वं लघु संयोगे गुरु दीर्घं च गुरु २ ह्रस्वो ३ नेतस्याः एकैकस्य मात्रा वा ह्रस्वादीनां त्रेधा कान्तस्य ह्रस्वादिभिन्ना
स्यापि गुरोः प्लुतो वा स्यात् देवदत्त३ देवदत्त देवदत्त गुरोः किं बकारादकारस्य मा भूत् अनन्त्यस्य किं कृष्ण एकैकग्रहणं पर्यायार्थं
ईदूदेद्द्विवचनं प्रगृह्यं ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात् हरी एतौ विष्णू इमौ गङ्गे अमू अदसो मात् अस्मात् परा ईदूतौ प्रगृह्यौ
स्तः अमी ईशाः रामकृष्णावमू आसाते मात् किं अमुकेऽत्र मात् ग्रहणं प्रकारोऽयं अनुवर्तते अमुकेऽत्र चादयोऽसत्त्वे लिङ्ग
संख्यान्वितं द्रव्यं अद्रव्यार्थाः स्युश्चादयो निपातसंज्ञाः स्युः प्रादयः एते अपि तथा निपातसंज्ञाः स्युः निपात एकाजनाङ् ॥ एको
ऽज्निपात आङ्वर्ज्यः प्रगृह्यसंज्ञः स्यात् इ इन्द्रः उ उमेशः अप्रगृह्यतः आनाङ् इत्युक्तेः ङिदाकारः प्रगृह्यस्तत एव ईषद
र्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् आ एवं नु मन्यसे आ एवं किल तत् ईषदुष्ण
म् ओष्णम् ओत् ओदन्तो निपातः प्रगृह्यः अहो ईशाः सम्बुद्धौ शाकल्यस्येतावनार्षे सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यो ।
ऽवैदिके इतौ परे विष्णो इति विष्ण इति विष्णविति अनार्षे किं ब्रह्मबन्धवित्यब्रवीत् मय उञो वो वा मयः परस्य उञो वो वा स्यात् अ
७ चि किमु उक्तं किम्वुक्तं वत्वस्यासिद्धत्वान्नानुस्वारः इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च पदान्ता इको ह्रस्वो वा असवर्णेऽचि
ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः चक्रि अत्र चक्र्यत्र पदान्ताः किं गौर्यौ न समासे वाप्यश्वः ऋत्यकः ऋति परे पदान्ता अकः प्रा
ग्वत् ब्रह्म ऋषिः ब्रह्मर्षिः पदान्ताः किं आर्च्छत् इत्यच्सन्धिः २ ॥ ॐ ॥ स्तोः श्चुना श्चुः सकारतवर्गयोः शकारचवर्गा
भ्यां योगे शकारचवर्गौ स्तः रामश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् शात्परस्य तवर्गस्य श्चुत्वं न स्यात् विश्नः प्रश्नः
ष्टुना ष्टुः स्तोः ष्टुना योगे ष्टुः स्यात् रामष्षष्ठः रामष्टीकते पेष्टा तट्टीकते चक्रिण्ढौकसे न पदान्ताट्टोरनाम् पदान्ताट्टवर्गा
त्परस्यानामः स्तोः ष्टुर्न स्यात् षट् सन्तः षट् ते पदान्तात् किं ईट्टे टोः किं सर्पिष्टमम् अनाम्नवतिनगरीणामिति वाच्यम् षण्णा
म् षण्णवतिः षण्णगर्यः तोः षि तवर्गस्य षकारे परे ष्टुत्वं न स्यात् सन्षष्ठः झलां जशोऽन्ते पदान्ते झलां जशः स्युः वागीशः चिद्रूपं
यरोऽनुनासिकेऽनुनासिको वा यरः पदान्तस्यानुनासिके परे अनुनासिको वा स्यात् एतन्मुरारिः एतद्मुरारिः प्रत्यये भाषायां नित्यं

तन्मात्रे विमात्रत्वं तोर्लि तवर्गस्य लकारे परे परसवर्णः । तल्लयः विद्वाँल्लिखति तस्यानुनासिको लः । उदः स्थास्तम्भोः पूर्व ।
स्य उदः परयोः स्थास्तम्भोः पूर्वसवर्णः तस्मादित्युत्तरस्य पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य
ज्ञेयम् आदेः परस्य परस्य यद्विहितं तत् तस्यादेर्बोध्यं अघोषस्य महाप्राणस्य विवारस्य श्वासस्य सस्य सस्थाने तादृश एव थकारः
इति सस्य थः झरो झरि सवर्णे हलः परस्य झरो वा लोपः सवर्णे झरि इति पदे थस्य लोपः लोपाभावपक्षे तस्य सवर्णे
न तत्व इति चेति चर्त्वे चर्त्वस्यासिद्धत्वात् खरि च खरि परे झलां चरः स्युः इत्युत्तरे दस्य तः उत्थाने उत्तम्भनं झयो हो ऽन्य ।
तरस्याम् झयः परस्य हस्य वा पूर्वसवर्णः संवारस्य नादस्य घोषस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः वाग्घरिः वाग्
हरिः शश्छोटि पदान्तात् झयः परस्य शस्य छो वा टि तच्छ्लोकेन तच्श्लोकेन अमि परे किं वाक्श्चोतति मोनुस्वारः मान्तस्य पद
दस्यानुस्वारो हलि हरिं वन्दे पदस्येति किं गम्यते नश्चापदान्तस्य झलि नस्य मस्य चापदान्तस्यानुस्वारो झलि यशांसि आ
क्रम्यते झलि किं मन्यते अनुस्वारस्य ययि परसवर्णः अञ्चितः शान्तः कुण्ठितः वा पदान्तस्य पदान्तस्यानुस्वारस्य य
यि परे परसवर्णो वा स्यात् त्वं करोषि त्वङ्करोषि संयन्ता सय्यँन्ता संवत्सरः सव्वँत्सरः यँल्लोकम् यल्लोकम् अत्रानुस्वारस्य
यत्वेनानुनासिको यवलाः मो राजि समः क्वौ किंवन्ते राजधातौ परे समो मस्य म एव सम्राट् हेमपरे वा मपरे हकारे परे मस्य
मो वा स्यात् किं ह्मलयति किम्ह्मलयति यवलपरे यवला वा यवले हकारे मस्य यवला वा स्युः किंह्यः किय्ह्यः किं ह्व
लयति किव्ह्वलयति किं ह्लादयति किल्ह्लादयति नपरे नः नपरे हकारे परे मस्य नः स्याद्वा किंह्नुते किन्ह्नुते ङ्णोः कुक्
टि कितौ टिकितौ परस्य ङ्को न्नस्य कमादाद्यन्तावयवौ स्तः डः सि धुट् डात्परस्य सस्य धुड्वा षट्त्सन्तः षट्सन्तः ङ्णोः कुक्
टुक् शरि ङकारणकारयोः कुक्टुकौ वा स्तः शरि प्राङ्क्षष्ठः प्राङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः नश्च नकारान्ता ।
त्परस्य सस्य धुड्वा सन्त्सः सन्सः शि तुक् पदान्तस्य नस्य शे तुग्वा सञ्च्छम्भुः सञ्शम्भुः सञ्छम्भुः ङमो ह्रस्वादचि ङमुण्नित्य ।
त्य ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुडागमः स्यान्नित्यम् प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः ॥
समः सुटि समो रुः स्यात् सुटि अत्रानुनासिकः पूर्वस्य तु वा ॥ अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा ॥ ७

ल. कौ. ७

प्रत्यनुनासिकात्परोऽनुस्वारः अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः खरवसानयोर्विसर्जनीयः खरि अवसाने च पदा
न्तस्य रस्य विसर्गः संपुंकानां सो वक्तव्यः संस्कर्ता संस्कर्ता पुमः खय्यम्परे अम्परे खयि पुमो रुः पुंस्कोकिलः
पुंस्कोकिलः नश्छव्यप्रशान् अम्परे छवि नान्तस्य पदस्य रुः विसर्जनीयस्य सः खरि चक्रिंस्त्रायस्व चक्रिंस्त्रायस्व अप्रशान् किं
प्रशान्तनोति पदान्तस्येति किं हन्ति नॄन्पे नॄनित्यस्य रुः स्याद्वा पे परे कुप्वोः ≍क≍पौ च कवर्गे पवर्गे च परे विसर्गस्य ≍क≍
पौ च स्यातां नॄः पाहि नॄ≍पाहि नॄंः पाहि नॄं≍पाहि नॄन्पाहि सोऽपदादौ विसर्गस्य सः स्यादपदाद्योः कुप्वोः पय
स्पाशम् यशस्कल्पम् यशस्कं यशस्काम्यति अनव्ययस्येति वाच्यम् प्रातःकल्पम् काम्ये रोरेवेति वाच्यं नेह गीःकाम्य
ति इणः षः इणः परस्य विसर्गस्य षः कुप्वोः सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्काम्यति कस्कादिषु च एष्विण उत्तरस्य विस
र्गस्य षः स्यादन्यस्य तु सः कस्कः कौतस्कुतः सर्पिष्कुण्डिका धनुष्कपालमित्यादि आकृतिगणोऽयं नस्य परस्मान्ते डित
द्धितस्य परस्मान्ते ड्डिते पात् कानाम्रेडिते कान्नकारस्य रुः स्यादाम्रेडिते कांस्कान् कांस्कान् छे च ह्रस्वस्य छे तुक् शिवच्छाया
पदान्ताद्वा दीर्घात्पदान्तात् छे तुग्वा लक्ष्मीच्छाया लक्ष्मीछाया इति हल्सन्धिः विसर्जनीयस्य सः खरि विष्णुस्त्राता वा शरि
शरि विसर्गस्य विसर्गो वा हरिः शेते हरिश्शेते इति विसर्गसन्धिः सोऽनन्तस्मोऽहिनि श्रुमनापे कृते शिवनम् अर्च्य इति स्थि
ते ससजुषो रुः पदान्तस्य सस्य सजुषश्च रुः स्यात् अतो रोरप्लुतादप्लुते अप्लुतादतः परस्य रोरुः स्यादप्लुते अति
शिवोऽर्च्यः हशि च तथा शिवो वन्द्यः भोभगोअघोअपूर्वस्य योऽशि एतत्पूर्वस्य रोर्यादेशोऽशि देवा इह देवायिह
भोस्भगोस्अघोस् एते सान्ता निपाताः तेषां रुत्वे यत्वे च कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदान्तयोर्यकारवका
रयोर्लघूच्चारणौ यवौ वा स्तोऽशि परे यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघुप्रयत्नतरः ओतो गार्ग्यस्य
पदान्तस्यालघुप्रयत्नस्य यस्य नित्यं लोपः भो अच्युत भोअच्युत लघुप्रयत्नपक्षे भोयच्युत हलि सर्वेषां भोभगोअघोअपू
अपूर्वस्य यस्य लोपः स्याद्धलि सर्वेषां मते भो देवाः भगो नमस्ते अघो याहि देवा यान्ति रोऽसुपि अह्नो रेफादेशो न तु सुपि
अहरहः अहर्गणः असुपि किं अहोभ्यां रोरि रेफस्य रेफे परे लोपः ढ्रलोपे पूर्वस्य दीर्घोऽणः ढरेफयोर्लोपनिमित्तयोः ॥

हर्वेस्याणो दीर्घः पुनारमते हरीरम्यः शम्भूराजते अग्नाः किंच ढः मनस् रथः इत्यत्र रुत्वे कृते हशि चोत्वे रो रीति लोपे च प्रा
मे विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति रो रीति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरी इत्यस्यासिद्धत्वादुत्वमे
व मनोरथः पतञ्जलिः सुलोपो कोरनञ्समासे हलि अकककारयोरेतत्तदोर्यः स्तत्तस्य लोपो हलि नञ्समासे न एष विष्णुः
स शंभुः अकोः किं एषको रुद्रः अनञ्समासे किं असः शिवः हलि किं एषोऽत्र सो चिल्लोपे चेत्पादपूरणं सश्च स्यसो लोपः
स्याद्वि पादश्चेल्लोपे सत्येव पूर्येत सैष दाशरथी रामः इति विसर्गसन्धिः अर्थवद्धातुरप्रत्ययः ॥ ॥
प्रातिपदिकं धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ
समासाश्च तथा स्वौजस् अमौट्शस् टाभ्याम्भिस् ङेभ्याम्भ्यस् ङसिभ्याम्भ्यस् ङसोसाम् ङ्योस्सुप् स्वौजस इति
प्रथमा अम् औट् शस् द्वितीया टाभ्याम् भिस् तृतीया ङेभ्याम् भ्यस् चतुर्थी ङसिभ्याम् भ्यस् पञ्चमी ङस् ओस्
आम् षष्ठी ङि ओस् सुप् सप्तमी ङ्याप्प्रातिपदिकात् ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः सुपः
सुपस्त्रीणि त्रीणि वचनान्येकैकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने द्वित्वैकत्वयो
रेते स्तः विरामोऽवसानम् वर्णानामभावोऽवसानसंज्ञः स्यात् रुत्वं विसर्गो रामः सरूपाणामेकशेष एकविभक्तौ एक
विभक्तौ यानि सरूपाणि दृष्टानि तेषामेक एव शिष्यते प्रथमयोः पूर्वसवर्णः अकः प्रथमाद्वितीययोरचि परे पूर्व
सवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते नादिचि अवर्णादिचि परे न पूर्वसवर्णदीर्घः वृद्धिरेचि रामौ बहुषु बहुवचनम् बहु
त्वे एतत्स्यात् चुटू प्रत्ययाद्यौ चुटू इतौ स्तः विभक्तिश्च सुप्तिङौ विभक्तिसंज्ञौ स्तः न विभक्तौ तुस्माः विभक्तिस्थास्तवर्ग
समा इतो न इति सस्य नेत्त्वम् रामाः एकवचनं संबुद्धिः संबोधने प्रथमायाः एकवचनं संबुद्धिसंज्ञं स्यात् यस्मात्प्र
त्ययविधिस्तदादि प्रत्यये ऽङ्गम् यः प्रत्ययो यस्मात् क्रियते तदादिशब्दरूपं तस्मिन् प्रत्यये अङ्गसंज्ञं स्यात् ॥
एङ्ह्रस्वात्संबुद्धेः एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल् लुप्यते संबुद्धिश्चेत् संबोधनेऽर्थे हेशब्दः प्राक्प्रयुज्यते

ल॰ कौ॰ प ८

हे राम हे रामौ हे रामाः ॥ अमि पूर्वः ॥ अकोऽम्यचि पूर्वरूपमेकादेशः स्यात् रामम् रामौ ॥ लशक्वतद्धिते ॥ तद्धितवर्जप्रत्ययाद्या ल
शकवर्गा इतः स्युः तस्माच्छसो नः पुंसि ॥ पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात् पुंसि ॥ अट्कुप्वाङ्नुम्व्यवायेऽपि ।
अट् कवर्गः पवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे इति सा
मे न पदान्तस्य ॥ पदान्तस्य नस्य णो न स्यात् रामान् ॥ टाङसिङसामिनात्स्याः ॥ अदन्तात् टादीनामिनादयः स्युः णत्वम् रामेण
सुपि च ॥ यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात् रामाभ्याम् ॥ अतो भिस ऐस् ॥ अतोऽङ्गात् भिस ऐस् स्यात् ॥ अनेकाल्शित्सर्वस्य ॥ र
ामैः ॥ ङेर्यः ॥ अतोऽङ्गात्परस्य ङेर्यादेशः स्यात् ॥ स्थानिवदादेशोऽनल्विधौ ॥ आदेशः स्थानिवत् स्यात् न तु स्थान्यलाश्रयविधौ इति
स्थानिवत्त्वात् सुपि चेति दीर्घः रामाय रामाभ्यां ॥ बहुवचने झल्येत् ॥ झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः रामेभ्यः सुपि किम्
पचध्वम् ॥ वावसाने ॥ अवसाने झलां चरो वा स्यात् रामात् रामाद् रामाभ्याम् रामेभ्यः रामस्य ॥ ओसि च ॥ अतोऽङ्गस्यैकारः स्यात्
रामयोः ॥ ह्रस्वनद्यापो नुट् ॥ ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् ॥ नामि ॥ अजन्ताङ्गस्य दीर्घो नामि रामाणा
म् रामे रामयोः एत्वे कृते ॥ आदेशप्रत्यययोः ॥ इण्कुभ्यां परस्याऽपदान्तस्यादेशस्य प्रत्ययावयवस्य च सकारस्य मूर्धन्यादे
शः स्यात् ईषद्विवृतस्य सस्य तादृश एव षः रामेषु एवं कृष्णादयोऽप्यदन्ताः ॥ सर्वादीनि सर्वनामानि ॥ सर्व विश्व उभ उभय डतर डत
म अन्य अन्यतर इतर त्वत् त्व नेम सम सिम ॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ स्वमज्ञातिधनाख्या
याम् ॥ अन्तरं बहिर्योगोपसंव्यानयोः ॥ त्यद् तद् यद् एतत् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् सर्वः सर्वौ ॥ जसः शी ॥ अ
दन्तात्सर्वनाम्नो जसः शी स्यात् अनेकाल्त्वात्सर्वादेशः सर्वे ॥ सर्वनाम्नः स्मै ॥ अतः सर्वनाम्नो ङेः स्मै स्यात् सर्वस्मै ॥ ङसिङ्
योः स्मात्स्मिनौ ॥ अतः सर्वनाम्न एतयोरेतौ स्तः सर्वस्मात् सर्वाभ्यां सर्वेभ्यः सर्वस्य सर्वयोः ॥ आमि सर्वनाम्नः सुट् ॥ अवर्णान्ता
त्सर्वनाम्नो विहितस्यामः सुट् ॥ ङामः एत्वषत्वे सर्वेषाम् सर्वस्मिन् शेषं रामवत् एवं विश्वादयोऽप्यदन्ताः संज्ञोपसर्जनीभूतास्तु
न सर्वादयः सर्वो नाम कश्चित्तस्मै सर्वाय देहि अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय उभशब्दो नित्यं द्विवचनान्तः
उभौ २ उभाभ्यां ३ उभयोः २ तस्येह पाठोऽकजर्थः डतरडतमौ प्रत्ययौ प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ॥

ॐ नेमइत्यर्थे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह यत एते समानामिति ज्ञापकात् ॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्था-
यामसंज्ञायां पूर्वादयो व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा पूर्वे पूर्वाः पूर्वे पूर्वाः स्वाभिधेया-
पेक्षावधिनियमो व्यवस्था व्यवस्थायां किम् दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किम् उत्तराः कुरवः स्वमज्ञाति-
धनाख्यायाम् ॥ ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्वे स्वाः आत्मीया आत्मान इति वा ज्ञातिधनवाचिनस्तु
स्वाः ज्ञातयोऽर्था वा ॥ अन्तरं बहिर्योगोपसंव्यानयोः ॥ बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा अन्तरे अन्त-
रा वा गृहाः बाह्या इत्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः ॥ पूर्वादिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मि-
नौ वा स्तः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं परादीनामपि शेषं सर्ववत् तृतीयासमासे सर्वनामता न स्यात् मासपू-
र्वाय तृतीयासमासार्थवाक्येऽपि न मासेन पूर्वाय द्वन्द्वे च ॥ उक्ता संज्ञा न वर्णाश्रमेतराणाम् ॥ विभाषा जसि ॥ वर्णाश्र-
मेतरे वर्णाश्रमेतराः ॥ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥ एते जसि उक्तसंज्ञा वा स्युः प्रथमे प्रथमाः तयः प्रत्ययः द्वित-
ये द्वितयाः शेषं रामवत् नेमे नेमाः शेषं सर्ववत् ॥ तृतीयस्य ङित्सु वा ॥ द्वितीयस्मै द्वितीयायेत्यादि एवं तृतीयः निर्जरः ॥
जराया जरसन्यतरस्याम् ॥ जरायाः जरस् वा स्यात् अजादौ विभक्तौ पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणम् अनेकाल्त्वात्सर्वादेशः
इति प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् निर्जरसौ निर्जरसः उपजीव्य-
विरोधाज्जरस् निर्जरैः इत्यादि पक्षे हलादौ च रामवत् विश्वपाः दीर्घाज्जसि च ॥ दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो
न विश्वपौ विश्वपाः विश्वपां विश्वपौ ॥ सुडनपुंसकस्य ॥ स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥
स्वादिपंचवचनानि सर्वनामस्थानं नसंज्ञानि स्युरक्लीबस्य । स्वादिष्वसर्वनामस्थाने ॥ कप्प्रत्ययावधिषु स्वादिष्वसर्वनाम-
स्थानेषु परेषु पूर्वं पदसंज्ञं स्यात् यचि भम् यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् आकडा-
रादेका संज्ञा ॥ इतऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया या पराऽनवकाशा च ॥ आतो धातोः ॥ आका-
रान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः ॥ अलोऽन्त्यस्य विश्वपः विश्वपा विश्वपाभ्यां विश्वपाभिः इत्यादि एवं शंख-

ल० कौ० ५०

धादयः। धातोः किम्। हाहा। हाहौ। हाहाः। हाहान्। अकः सवर्णे दीर्घः। हाहा। हाहाभ्यां। हाहाभिः। वृद्धिरेचि। हाहै। अकः सवर्णे
दीर्घः। हाहाम्। आद्गुणः। हाहे। हाहौः। हाहासु। हरिः। प्रथमयोः पूर्वसवर्णः। हरी। जसिच। ह्रस्वांतस्यांगस्य गुणः। हरयः। ह्र-
स्वस्य गुणः संबुद्धौ। हे हरे। हरिं। हरी। हरीन्। शेषो घ्यसखि। शेष इति स्पष्टार्थं ह्रस्वौ याविदुतौ तदंतं सखिवर्जं घिसंज्ञं स्यात्।
आङो नाऽस्त्रियां। घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा। हरिणा। हरिभ्यां। हरिभिः। घेर्ङिति। घिसंज्ञकस्य ङिति सु-
पि गुणः। हरये। हरिभ्यां। गुणे कृते। ङसिङसोश्च। एङो ङसिङसोरति पूर्वरूपमेकादेशः। हरेः। हरिभ्यां। हरिभ्यः। हरेः। ह-
र्योः। हरीणाम्। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौत् घेरत्। वृद्धिरेचि। हरौ। हर्योः। हरिषु। ७ एवं कव्यादयः। अनङ् सौ। स-
ख्युरंगस्यानङादेशोऽसंबुद्धौ सौ। अलोन्त्यात्पूर्व उपधा। अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चासं-
बुद्धौ। नांतस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने। अपृक्त एकाल् प्रत्ययः। एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्।
हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। हलंतात्परं दीर्घौ यौ ङ्यापौ तदंतात्परं सुतिसि इत्येतदपृक्तं हल् लुप्यते। प्रत्यय-
लोपे प्रत्ययलक्षणम्। प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात्। नलोपः प्रातिपदिकांतस्य। प्रातिपदिकसंज्ञकं यत्पदं तदंत-
स्य नस्य लोपः स्यात्। सखा। सख्युरसंबुद्धौ। सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्। अचो ञ्णिति। अजं-
तांगस्य वृद्धिर्ञिति णिति च। सखायौ। सखायः। हे सखे। सखायं। सखायौ। सखीन्। सख्या। सखिभ्यां। सखिभिः। सख्ये। सखि-
भ्यां। सखिभ्यः। ख्यत्यात्परस्य। खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः। सख्युः। सखिभ्यां।
सखिभ्यः। सख्युः। सख्योः। सखीनां। औत्। इत उत्तरस्य ङेरौत्। सख्यौ। शेषं हरिवत्। पतिः समास एव घिसंज्ञः। पत्या।
पत्ये। पत्युः। पत्युः। पत्योः। शेषं हरिवत्। समासे तु भूपतये। कतिशब्दो नित्यं बहुवचनांतः। बहुगणवतुडति संख्या। डति च। डत्यं-
तासंख्या षट्संज्ञा स्यात्। षड्भ्यो लुक्। जश्शसोः। षड्भ्यः परयोः जश्शसोर्लुक् स्यात्। प्रत्ययस्य लुक्श्लुलुपः। लुक्श्लु-
लुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात् तत्तत्संज्ञं स्यात्। जसि चेति गुणे प्राप्ते। न लुमतांगस्य। लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं

नेऽपि

लु

यैनस्थान् कति २ कतिभिः कतिभ्यः २ कतीनां कतिषु ॥ अस्मद्युष्मत्षट्संज्ञाः त्रिषु सरूपाः ॥ त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रयः
आमि त्रयाणां त्रिषु गौणत्वेपि प्रियत्रयाणां ॥ त्यदादीनामः ॥ एषामः स्यात् विभक्तौ ॥ द्विपर्यंतानामेवेष्टः ॥ द्वौ २ द्वाभ्यां ३ द्वयोः २
पाति लोकमिति पपीः सूर्यः ॥ पप्यौ पप्यः पपीं पप्यौ पपीन् पप्या पपीभ्यां ३ पपीभिः पप्ये पपीभ्यः पप्यः पप्योः पप्यां पप्यौ प
प्योः पपीषु ॥ एवं वातप्रम्यादयः ॥ बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥ सुस्वाद्यो नदी ॥ ईदूतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ
स्तः ॥ प्रथमलिंगग्रहणं च पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः ॥ अंबार्थनद्योर्ह्रस्वः ॥ अंबार्थानां नद्यंतानां
च ह्रस्वः स्यात् संबुद्धौ सौ परे ॥ हे बहुश्रेयसि ॥ आण्नद्याः ॥ नद्यंतात्परेषां ङितां आडागमः स्यात् ॥ आटश्च ॥ आटो विवृद्धिरे
का देशः बहुश्रेयस्यै बहुश्रेयस्याः २ बहुश्रेयसीनां ॥ ङेराम्नद्याम्नीभ्यः ॥ नद्यंतादाबंतान्नीशब्दाच्च परस्य ङेराम् स्यात् ॥ बहु
श्रेयस्यां शेषं पपीवत् ॥ अतिलक्ष्मीः शेषं बहुश्रेयसीवत् ॥ प्रधीः ॥ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ श्नुप्रत्ययांतस्य धातो
रिवर्णोवर्णांतस्य भ्रुवश्च इयङुवङौ स्तः ॥ वर्णे ॥ अजादौ प्रत्यये परे ॥ एरनेकाचोऽसंयोगपूर्वस्य ॥ धात्ववयवसंयोगपूर्वो न
भवति य इवर्णः तदंतो योधातुस्तदंतस्यानेकाचोऽगस्य यण्स्यादजादौ प्रत्यये परे ॥ संयोगपूर्वस्य किम् ॥ सुश्रियौ ॥ एवं क्रियौ ॥ प्र
ध्यौ प्रध्यः ॥ अमि शसि च ॥ प्रध्यं प्रध्यौ प्रध्यः ॥ प्रध्या प्रधीभ्यां प्रधीभिः प्रध्ये प्रध्यः २ प्रध्योः प्रध्यां प्रध्यि शेषं पपीवत् ॥ एवं ग्रा
मणीः ॥ ङौ तु ग्रामण्यां ॥ नीः ॥ नियौ ॥ न्यादयः ॥ क्रियार्थोपपदस्य गतिसंज्ञा स्यात् ॥ गतिकारकेतरपूर्वपदस्य यणो नेष्यते ॥ शुद्धधियौ नद्यौ
सुधियौ ॥ एतयोः इति सुधियौ नद्यौ सुधियौ सुधियः ॥ अमि शसि च परत्वादियङ् ॥ सुधियं सुधियौ सुधियः ॥ सुधिया इत्यादि ॥ सखिमिच्छ
तीति सखीः ॥ सख्यौ सख्यः ॥ सुती ॥ सुत्यौ सुत्यः ॥ शेषं प्रधीवत् ॥ शंभुर्हरिवत् ॥ एवं भान्वादयः ॥ तृज्वत् क्रोष्टुः ॥ असंबुद्धौ सर्वनाम
स्थाने क्रोष्टुः क्रोष्टृ शब्दस्य तृजंतवद्रूपं स्यादित्यर्थः ॥ ऋतो ङिसर्वनामस्थानयोः ॥ ऋदंतांगस्य गुणः ॥ डौ सर्वनामस्थाने च ॥ इति स्थानि
वद्भावे शकारस्य रदेशो ... नेह सौ च ऋदुशनस्पुरुदंसोऽनेहसां च ॥ ऋदंतानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे ॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहो
तृपोतृप्रशास्तॄणाम् ॥ एषामुपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने ॥ क्रोष्टा क्रोष्टारौ क्रोष्टारः ॥ ह्रस्वस्य गुणः ॥ हे क्रोष्टो हे क्रोष्टवः ॥
क्रोष्टारं क्रोष्टारौ ॥ प्रथमयोः पूर्वसवर्णः ॥ नस्माच्छसो नः पुंसि ॥ क्रोष्टून् ॥

नी

वा॰यूलि॰ कौ॰ ६ प॰

विभाषा तृतीयादिष्वचि॥ अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्॥ णेर्वोयमविति॥ आङो नास्त्रियां॥ क्रोष्टुना क्रोष्ट्रा क्रो
ष्टुभ्यां क्रोष्टुभिः क्रोष्ट्रे। घेर्ङिति। पक्षे घेर्ङितीति। क्रोष्टवे क्रोष्टुभ्यां क्रोष्टुभ्यः॥ ऋत उत्॥ ऋतः ङसिङसोरति उकार एका
देशः॥ रपरः॥ रात्सस्य॥ रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य क्रोष्टुः क्रोष्टोः क्रोष्टुभ्यां क्रोष्टुभ्यः क्रोष्टुः क्रोष्टोः॥ इको
५ यणचि। क्रोष्ट्रोः क्रोष्ट्वोः। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ह्रस्वनद्यापो नुट्। नामि क्रोष्टूनां क्रोष्टरि
अच्च घेः। इ.उो तयोरत् क्रोष्टौ पक्षे हलादौ च साधुवत् हूहूः हूहौ हूहूः इत्यादि अतिचमूशब्दे तु नदीकार्यं विशे
षः हे अतिचमु अतिचमूः प्रथमयोरिति प्राप्ते दीर्घाज्जसि च इति निषेधः॥ इको यणचि इति अतिचम्वौ अतिचम्वः
अतिचमूं अतिचम्वौ॥ इको यणचि इति प्राप्ते प्रथमयोः पूर्वसवर्णः॥ इयमपवादः अतिचमून् स्त्रियां अतिचम्वा अतिच
मूभिः॥ इको यणचि अग्रगा आटश्च॥ अतिचम्वै अतिचम्वाः २ अतिचमूनां अतिचम्वां खलपूः। ओः सुपि धातव
वयवसंयोगपूर्वो न भवति य उवर्णः तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि खलप्वौ खलप्वः
एवं सुल्वादयः स्वभूः स्त्वनानीति स्वलः स्वभवतीति स्वभूः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ न भूसुधियोः एतयो
रपि स्वपि न यण् स्वभुवः वर्षाभ्वश्च अस्य यणः स्यादचि सुपि वर्षाभ्वौ इत्यादि दृन्भूः दृन्करपुनः पूर्वस्य भुवो यण
वक्तव्यः दृन्भ्वौ एवं करभूः पुनर्भूः धाता॥ ऋदुशनस्पुरुदंसोऽनेहसां च॥ ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ
होतृपोतृप्रशास्तृणां च ... दीर्घः॥ नलोपः। प्रातिपदिकान्तस्य इति नकारलोपः स्यात् धाता हे धातः धातारौ
धातारः॥ ऋवर्णान्नस्य णत्वं वाच्यम् धातॄणां एवं नप्त्रादयः॥ नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं॥ उणादीनां
तत्त्वं ज्ञातावेत हिं नप्त्रादीनामेव तेनेह न पिता पितरौ पितरः पितरं शेषं धातृवत् एवं जामातृभ्रात्रादयः ना नरौ नरः
नृ च॥ अस्य नामि वा दीर्घः नृणां नॄणां॥ गोतो णित्। गोकाराद्विहितं सर्वनामस्थानं णिद्वत् गौः गावौ गावः॥

ॐ. ओतोम्शसोः आ ओत इति छेदः ओटतादम् शसोरचि आकार एकादेशः स्यात् गाम् गावौ गाः गवा गोभ्यां गोभिः
गवे गोः इत्यादि। रायोहलि अस्याकारादेशो हलि विभक्तौ राः रायौ रायः राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौभ्या
मित्यादि। इत्यजन्ताः पुंलिंगाः। रमा औङ आपः आवन्तादंगादौङः शी स्यात् औङ् इत्यौकारविभक्तेः संज्ञा रमे रमाः ॥
संबुद्धौ च आप एकारः हे रमे हे रमे हे रमाः रमाम् रमे रमाः। आङि चापः। आङि ओसि चाप एकारः रमया रमाभ्यां रमा
भिः। याडापः। आपो ङितो याट् वृद्धिः रमायै रमाभ्यां रमाभ्यः रमायाः २ रमयोः रमाणाम् रमायाम् रमयोः रमासु ॥ एवं दु
र्गाम्बिकादयः सर्वा सर्वे सर्वाः सर्वनाम्नः स्याड्ढ्रस्वश्च आवन्तात्सर्वनाम्नो ङितः स्याट् स्यादापश्च ह्रस्वः सर्वस्यै सर्वाभ्यां
सर्वाभ्यः सर्वस्याः २ सर्वासाम् शेषं रमावत् एवं विश्वादय आवन्ताः विभाषा दिक्समासे बहुव्रीहौ सर्वनामता वा
हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् उत्तरपूर्वा औङ् आपः उत्तरपूर्वे प्रथमयोः एवं सवर्णाः उत्तरपूर्वाः अमि पूर्वः
उत्तरपूर्वाम् उत्तरपूर्वे उत्तरपूर्वाः आङि चापः उत्तरपूर्वया सर्वनाम्नः स्याड्ढ्रस्वश्च वृद्धिः उत्तरपूर्वस्यै याडापः ॥
आटश्च उत्तरपूर्वायै उत्तरपूर्वाभ्याम् उत्तरपूर्वाभ्यः उत्तरपूर्वस्याः उत्तरपूर्वायाः २ उत्तरपूर्वयोः उत्तरपूर्वासाम्
उत्तरपूर्वाणाम् उत्तरपूर्वस्याम् उत्तरपूर्वायाम् उत्तरपूर्वासु तीयस्य ङित्सु वा संज्ञा द्वितीयस्यै द्वितीयायै एवं तृ
तीया अम्बार्थनद्योर्ह्रस्वः हे अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न हे अम्बाडे हे अम्बाले हे अम्बि
के जरा जरसौ जरे इत्यादि पक्षे रमावत् गोपा विश्वपावत् मतिः ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दं भित्त्वा नि
त्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति मत्यै मतये मत्याः मतेः २ इदुद्भ्याम् नदीसंज्ञ
काभ्यामिदुद्भ्यां परस्य ङेराम् मत्याम् मतौ शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरे
तयोरेतौ स्तो विभक्तौ अचि र ऋतः तिसृचतसृ ऋकारस्य रेफादेशः स्यात् गुणदीर्घोत्वानामपवादः तिस्रः २ तिसृभिः ॥

आमि नुट् । न तिसृचतसृ । एतयोर्नामि न दीर्घः । तिसृणाम् । तिसृषु । द्वे २ । द्वाभ्याम् ३ । द्वयोः २ । गौरी गौर्यौ गौर्यः । हे गौ-
रि । गौर्यां इत्यादि । एवं नद्यादयः । लक्ष्मीः । शेषं नदीवत् । एवं तरीतन्त्र्यादयः । स्त्री । हे स्त्रि । स्त्रियाः । अस्येयङ् अजादौ प्रत्यये
परे स्त्रियौ स्त्रियः । वाम्शसोः । स्त्रिया इयङ् वा स्यादमि शसि च परे । स्त्रियम् स्त्रीम् स्त्रियौ स्त्रियः स्त्रीः । स्त्रिया स्त्रियै स्त्रियाः
परत्वान्नुट् स्त्रीणाम् स्त्रीषु । श्रीः श्रियौ श्रियः । श्रियम् श्रियौ श्रियः श्रिया । नेयङुवङ्स्थानावस्त्री । इयङुवङोः स्थि-
तिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री । हे श्रीः । ङिति ह्रस्वश्च । श्रियै श्रिये । श्रियाः श्रियः । वामि । इयङुवङ्स्था-
नौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री । श्रीणाम् श्रियाम् । श्रियि श्रियाम् । धेनुर्मतिवत् । धेनुः धेनू धेनवः ।
धेनुम् धेनू धेनूः । धेन्वा धेनुभ्याम् धेनुभिः । धेन्वै धेनवे धेनुभ्याम् धेनुभ्यः । धेन्वाः धेनोः । धेन्वां धेनौ । स्त्रियाञ्च । स्त्री-
वाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते । ऋन्नेभ्यो ङीप् । ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् । क्रोष्ट्री गौरीवत् । वधूर्गौरीवत् । भ्रू-
श्रीवत् । स्वयम्भूः पुंवत् । न षट्स्वस्रादिभ्यः । षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता
मातेति सप्तैते स्वस्रादय उदाहृताः । स्वसा स्वसारौ । शेषं धातृवत् । माता पितृवत् । शसि मातॄः । द्यौर्गोवत् । राः पुंवत् । नौः
ग्लौवत् ॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥ अतोऽम् । अतोऽङ्गात् क्लीबात् स्वमोरम् स्यात् । ज्ञानम् । एङ्ह्रस्वादिति हल्लोपः । हे ज्ञान । नपुंस-
काच्च । क्लीबादौङः शी स्यात् । भसंज्ञायाम् । यस्येति च । ईकारे तद्धिते च परे भस्य वर्णावर्णयोर्लोपः । इत्यल्लोपे प्राप्ते । औङः श्यां प्र-
तिषेधो वाच्यः । ज्ञाने । जश्शसोः शिः । क्लीबात् । शि सर्वनामस्थानम् । नपुंसकस्य शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात् । नपुंस-
कस्य झलचः । झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने । मिदचोऽन्त्यात्परः । अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवा-
न्तावयवो मित्स्यात् । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं रामवत् । एवं धनादयः । अद्ड्डतरादिभ्यः पञ्चभ्यः । पञ्चभ्यः क्लीबे भ्य
भ्यः स्वमोरद्ड् आदेशः । टेः इति भस्य टेर्लोपः । कतरत् कतरद् कतरे कतराणि । हे कतरत् । शेषं पुंवत् । कतमत् इतरत् ॥

१८ कौमु.

'एकत'

अन्यत् अन्यतरत् अन्यतमस्मात् अन्यतममिमेव एकतरात् इति शेषे एव क्रमः एकतरं ह्रस्वो नपुंसके प्रातिपदिकस्य अजन्तं
तस्य प्रातिपदिकस्य ह्रस्वः स्यात् श्रीपं ज्ञानवत् स्वमोर्नपुंसकात् लुक् वारि इकोऽचि विभक्तौ। इगन्तस्याङ्गस्य नुम् अचि विभ
क्तौ वारिणी वारीणि न लुमतेत्यस्यानित्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः हे वारे हे वारि घेर्ङिति गुणे प्राप्ते वृद्ध्यौत्व
तृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन वारिणे वारिणः वारिणोः नुमचिरतृज्वद्भावेभ्यो नुट् वारीणां वारिणि हलादौ हरिवत्
अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः टादावचि अल्लोपोऽनः अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याका
रस्य लोपः दध्ना दध्ने दध्नः दध्नोः २। विभाषा ङिश्योः अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिप्रत्ययपरो योऽन् तस्याकारस्य लोपो वा ङिश्योः
दध्नि दधनि शेषं वारिवत् एवमस्थिसक्थ्यक्षि सुधि सुधिनी सुधीनि हे सुधे हे सुधि तृतीयादिषु भाषितपुंस्कं पुंवद्
गालवस्य इकोऽचीति निमित्ते भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि सुधिया सुधिनेत्यादि मधु मधुनी मधूनि हे मधो
हे मधु एवमम्ब्वादयः सुलु सुलुनी सुलूनि सुल्वा सुलुनेत्यादि धातृ धातृणी धातॄणि हे धातः हे धातृ तथा ज्ञातृ धातृणा ए
वं ज्ञात्रादयः एच इग्घ्रस्वादेशे प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युनेत्यादि प्ररि प्ररिणी प्ररीणि प्ररिणा एकदेशविकृतमनन्यव
त् प्ररास्याम् प्ररीणाम् सुनु सुनुनी सुनूनि सुनुनेत्यादि ॥ इत्यजन्ताः नपुंसकलिङ्गाः ॥ हो ढः झलि पदान्ते च लिट् लिड् लिहौ
लिहः लिहा लिड्भ्यां लिट्सु लिट्त्सु दादेर्धातोर्घः झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः एकाचो बशो भष् झषन्तस्य स्ध्वोः
धात्ववयवस्यैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च धुक् धुग् दुहौ दुहः धुग्भ्यां धुक्षु वा द्रुहमुहष्णुहष्णिहाम् एषां हस्य
वा घः झलि पदान्ते च ध्रुक् ध्रुग् ध्रुट् ध्रुड् द्रुहौ ध्रुग्भ्या ध्रुक्षु ध्रुट्सु एवं मुह् धात्वादेः षः सः स्नुक् स्नुग् स्नुट् स्नुड् एवं स्निह् इग्यणः संप्रसारणं य
णः स्थाने भविष्यमाण इक् संप्रसारणसंज्ञः स्यात् वाह ऊठ् भस्य वाहः संप्रसारणमूठ् संप्रसारणाच्च संप्रसारणादचि पूर्व
रूपमेकादेशः एत्येधत्यूठ्सु वृद्धिः विश्वौहः विश्वौहे इत्यादि चतुरनडुहोरामुदात्तः सर्वनामस्थाने आम् अनडुहः नुम् स्यात् अनड्वान्
अम् संबुद्धौ चतुरनडुहोः हे अनड्वन् अनड्वाहौ अनडुहः वसुस्रंसुध्वंस्वनडुहां दः सान्तवसन्तस्य स्रंसादेश्च दः पदान्ते
अनडुद्भ्यां सान्तमहतः संयोगस्य सान्तसंयोगस्य महतश्च नस्योपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने श्रेयान् श्रेयांसौ इत्यादि स्वयमेव

वो मोणः

ल. कौ. ८८

दिव इति प्रातिपदिकस्यौत्स्यात् सुद्यौः सुदिवौ दिव उत् पदान्ते सुद्युभ्याम् इत्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ षट्चतु
र्भ्यश्च षभ्यः आमो नुडागमः । रषाभ्यां नो णः समानपदे चतुर्णाम् । रोः सुपि रोरेव विसर्गः सुपि चतुर्षु । मो नो धा
तोः पदान्ते प्रशान् प्रशामौ प्रशान्भ्याम् । किमः कः विभक्तौ कः कौ के इत्यादि सर्ववत् । इदमो मः । सौ त्यदाद्यत्वापवा
दः । इदो य् पुंसि । इदम इदो य् सौ पुंसि अयं त्यदाद्यत्वे अतो गुणे अपदान्तादतो गुणे पररूपमेकादेशः दश्च इदमो
दस्य मः स्यादिभक्तौ इमौ इमे त्यदादेः संबोधनं नास्तीत्युत्सर्गः अनाप्यकः । अककारस्य इदम इदो अना आपि विभ
क्तौ आपि विति प्रत्याहारः अनेन । हलि लोपः अककारस्य इदम इदो लोप आपि हलादौ नानर्थकेऽलोऽन्त्यविधिरन
भ्यासविकारे आद्यन्तवदेकस्मिन् एकस्मिन् क्रियमाणं कार्यं आदाविवान्त इवस्यात् सुपि च दीर्घः आभ्याम् ।
नेदमदसोरकोः अककारयोरिदमदसोर्भिस ऐस न एभिः अस्मै एभ्यः अस्मात् अस्य अनयोः २ एषाम् अस्मिन्
एषु द्वितीयाटौस्स्वेनः इदमेतदोरन्वादेशे किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादे
शः यथानेन व्याकरणमधीतमेनं छन्दोऽध्यापय अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति एनं एनौ एनान्
एनेन एनयोः राजा नङि संबुद्ध्योः नस्य लोपो न ङौ संबुद्धौ च हे राजन् परमे व्योमन् ङावुत्तरपदे प्रतिषेधः ब्रह्म
निष्ठः राजानौ राजानः राजानं राज्ञः नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति सुब्विधौ स्वरविधौ संज्ञाविधौ कृ
ति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न राजभ्याम् राज्ञि राजनि य
ज्वा यज्वानौ यज्वानः । न संयोगाद्वमन्तात् । वमन्तसंयोगादनोऽकारस्य लोपो न यज्वनः यज्वभ्याम् ब्रह्मा ब्रह्माणौ
ब्रह्माणं ब्रह्माणौ ब्रह्मणः ब्रह्मणा । इन् हन् पूषार्यम्णां शौ । एषां शावेवोपधाया दीर्घः सौ च इन्नादीनामुपधाया दी
यादीर्घः संबुद्धौ सौ वृत्रहा हे वृत्रहन् । एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्ता

पद नै

ॐ. न्यतरस्यामिति पदांतस्य विभक्तिस्थस्य नस्य णः वृत्रहणौ हो हंतेर्ञ्णिन्नेषु इति निमित्तमन्यदेव परे हंतेर्हस्य कुत्वं
हंतेरत्पूर्वस्य हंतेरकारस्य घत्वं स्यात्तस्य णोन्नास्य वृत्रघ्नः वृत्रघ्ना वृत्रहभ्यां वृत्रघ्नि वृत्रहणि इत्यादि एवं शार्ङ्गिन्
यशस्विन्नर्यमन्पूषन् पूषा पूषणौ पूषणो र्योगे पूष्णः पूषणः पूषभ्यां पूष्णि पूषणि मघवा बहुलं मघवन्शब्दस्य वा
तृ इत्यंतादेशः ऋ इत् नावंवंथ कृतमनेकालत्वं उगिदचां सर्वनामस्थानेऽधातोः अधातोरुगितो नलोपिनो
चांचेश्च नुम् स्यात्सर्वनामस्थाने मघवान् मघवंतौ मघवंतः हे मघवन् मघवंतं मघवतः मघवद्भ्यां तृत्वाभा
वे मघवा राजवत् श्वयुवमघोनामतद्धिते अन्नंतानां भानामेषामतद्धिते परे संप्रसारणं स्यात् मघोनः
मघवभ्यां श्वा श्वानौ श्वानः शुनः २ शुना श्वभ्यां अर्वा हे अर्वन् अर्वणस्त्रसावनञः नञा रहितस्यार्वन्नित्यस्यांग
स्य तृ इत्यंतादेशो न तु सौ उगित्वान्नुम् अर्वंतौ अर्वद्भ्यां पथिमथ्यृभुक्षामात् पथाम् आकारांतादेशः स्यात् इतोऽत्सर्वना
मस्थाने पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने थो न्थः पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने पंथाः पं
थानौ पंथानः भस्य टेर्लोपः भस्य पथ्यादेष्टेर्लोपः पथः पथिभ्यां एवं मंथाः ऋभुक्षाः ष्णांता षट् ष्णांता नांताश्च सं
ख्याः षट्संज्ञाः स्यात् पंच पंचभिः नोपधायाः नांतस्योपधाया दीर्घो नामि पंचानां पंचसु अष्टन आ विभक्तौ
हलादौ वा स्यात् अष्टाभ्य औश् कृताकारादष्टनो जश्शसोरौश् अष्टभ्यः इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्वि
षये आत्वं ज्ञापयति अष्टौ अष्टाभिः अष्टाभ्यः २ अष्टानां अष्टासु आत्वाभावे अष्टन् पंचवत् ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजि
क्रुंचां च एभ्यः क्विन् स्यात् अंचेः सुप्युपपदे युजिक्रुंचोः केवलयोः क्विन्नांतस्य कुः ऋत्विक् अन्यथानुपपत्त्या क्विन्प्रत्ययः
कृत्वं ऋत्विक् सलोपः अष्टन्क स्य वस्य लोपः क्विन्प्रत्ययस्य कुः क्विन्नंतस्य मा हि हिम स्यात् कुः पदांते स्यात् ऋत्विग् ऋत्विजौ ॥
ऋत्विग्भ्यां युजेरसमासे युजेः सर्वनामस्थाने नुम् स्यादसमासे हलोपः संयोगांतस्य लोपः कुत्वेन नस्य ङः युङ् युंजौ युंजः युग्भ्यां असमासे किं
योः कुः चवर्गस्य कवर्गः स्यात् झलि पदांते च सुयुक् सुयुजौ सुयुग्भ्यां

सा॰ टी॰ कौ॰ ५१

निमित्ताभावे नैमित्तिकस्याप्यभावः त्वन् त्वन्नौ त्वन्नः। व्रश्चभ्रस्जसृजमृजयजराज्भ्राजच्छशां षः कलिपदांते

च जश्त्वे राट् राड् राजौ राजः एवं विभ्राट् देवेट् देवेजौ विश्वसृट् परिमृट् परोक्षेः षः परांते पराक्षुपदे ऋते

क्विप्स्पृशी। वश्चपरांते षत्वमपि परिव्राट् परिव्राजौ विश्वस्य वसुराटोः विश्वस्य दीर्घो वसौ राडित्यपरे विश्वराट् एव

इति परांते पत्वलक्षणार्थं वर्तमानमविवक्षितं विश्वराजौ विश्वराजः स्कोः संयोगाद्योरंते च पदांते कलिपरयोः संयो

गादौ यौ सकारककारौ तयोः सकारलोपः भ्रस्ज भृट् भृड् सस्य श्चुत्वेन शः कलांजश् श्चवीति सस्य जः भृज्जौ भृज्जः त्यदाद्यत्वप

ररूपत्वं तदोः सः सावनंत्ययोः त्यदादीनां तदयोरनंत्ययोः सः स्यात् सौ परे स्यः त्यौ त्ये स्यः त्यौ त्ये एषः एतौ एते इत्या

दि युष्मदस्मदोः युष्मदस्मदोः परस्य ङेः ममा द्वितीयायोश्चात्वमादेशः त्वाहौ सौ अनयोर्मपर्यंतस्य त्वाहादेशौ

त्वः सौ परे सलोपः अत्र यत्वनिमित्तविभक्तौ परतः एतयोरष्टलोपः त्वमहं युवावौ द्विवचने अनयोः त्वावनयोर्मप

र्यंतयोः युवावौ स्तो विभक्तौ प्रथमायाश्च द्विवचने भाषायां औ इति एतयोरात्वं लोके युवां आवां यूयवयौ जसि अन

योर्मपर्यंतस्य यूयवयौ स्तः यूयं वयं त्वमावेकवचने एकस्योक्तावनयोर्मपर्यंतयोस्त्वमौ स्तः द्वितीयायां च अन

योरात्स्यात् त्वां मां युवां आवां शसोनः आभ्यां शसोनः स्यात् नोपवादः आदेः परस्य संयोगांतस्य लोपः युष्मान् अ

स्मान् योचि अनयोर्यादेशः नादेशः आदौ विभक्तौ त्वया मया युष्मदस्मदोरनादेशे अनयोरात्स्यात् अनादेशे ह

लादौ विभक्तौ युवाभ्यां आवाभ्यां ३ युष्माभिः अस्माभिः तुभ्यमह्यौ ङयि अनयोर्मपर्यंतयोरेतौ स्तः तुभ्यं मह्यं

भ्यसोऽभ्यम् आभ्यां परस्य युष्मभ्यं अस्मभ्यं एकवचनस्य च आभ्यां ङसेः अत् त्वत् मत् पंचम्या अत् आभ्यां परस्य भ्य

सोत्स्यात् युष्मत् अस्मत् अनयोर्मपर्यंतस्य युष्मदस्मदोर्ङसोश् तव मम युवयोः आवयोः साम आकं आभ्यां

साम आकं स्यात् युष्माकं अस्माकं त्वयि मयि युष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ

पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनौ एतावादेशौ स्तः वहुवचनस्य वस्नसौ उक्तविषययोः
रनयोः षष्ठ्या वचनांतयोर्वस्नसौ स्तः तेमयावेकवचनस्य उक्तविषययोः षष्ठीचतुर्थ्येकवचनांतयोस्तेमयौ स्तः
त्वामौ द्वितीयायाः द्वितीयैकवचनांतयोः त्वामा एतौ स्तः श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म्मसः स्वामी ते मेपि
सहरिः पातु वामपि नो विभुः १ सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र
वः सनः २ एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकतिङ् वाक्यं तेनेह न ओदनं पच तव भविष्यति एते वांनावादय
आदेशा अनन्वादेशे वा वक्तव्याः अन्वादेशे तु नित्यं स्युः धाता ते भक्तो स्ति धाता तव भक्तो स्तीति वा तस्मै ते नमः इत्येव सुप
त् सुपादौ पादः पत् पादशब्दांतस्य भसंज्ञकस्य पाच्छब्दस्य पदादेशः सुपदः सुपादौ अग्निमत् अनिदितां
हल उपधायाः क्ङिति हलंतानामनिदितामंगानामुपधाया नस्य लोपः किति ङिति च संयोगांतस्य लोपः नस्य
कुत्वेन ङः प्राङ् प्राञ्चौ प्राञ्चः अचः लुप्तनकारस्यांचतेर्भस्याकारस्य लोपः चौ लुप्ताकारनकारेंचतौ परे पूर्वस्याणो
दीर्घः प्राचः प्राग्भ्यां प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रतीचः प्रत्यग्भ्यां उदङ् उदञ्चौ उदईत् उच्छब्दात्परस्य लुप्तनकार
स्यांचतेर्भस्याकारस्य ईत् उदीचः उदग्भ्यां समः समि वप्रत्ययांतेंचतौ सम्यङ् सम्यञ्चौ समीचः सम्यग्भ्यां सहस्य
सध्रिः तथा सध्र्यङ् तिरसस्तिर्यलोपे अलुप्ताकारेंचतौ वप्रत्ययांते तिरसस्तिर्यादेशः तिर्यङ् तिर्यञ्चौ तिर्यञ्चः
तिरश्चः तिरश्चा तिर्यग्भ्यां नांचेः पूजायां पूजार्थस्यांचतेरुपधाया नस्य लोपो न प्राङ् प्राञ्चौ न लोपाभावाद्लो
पो न प्राञ्चः प्राङ्भ्यां प्राङ्क्षु एवं पूजार्थे प्रत्यङादयः क्रुङ् क्रुङ्भ्यां पयोमुक् पयोमुचौ पयोमुग्भ्यां महत् पूजायां
वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च एते निपात्यंते शतृवच्चैषां कार्यं स्यात् उगिदचां नुम् सांतमहतः संयोगस्य
सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने महान् महांतौ महांतः हे महन्

ओं लु कौ १८

महतः महता महद्भ्यां अत्वसंतस्य चाधातोः अत्वंतस्योपधाया दीर्घो धातुभिन्नः सन्तस्य चासंबुद्धौ [illegible] वत्
मंवाधित्वावचनसामर्थ्याद्वा दीर्घः धीमान् धीमंतौ हे धीमन् शशादो मन्वत्‌ भातेर्डवतुश् डित्वसामर्थ्या [illegible]
पिटेर्लोपः भवान् भवंतौ शत्रन्तस्य तु भवन् उभेभ्यस्तु बाधाहिन प्रकरणेयेद्वे विहिते ते उभे सम्नुदिते अभ्यस्तं सं
ज्ञेस्तः नाभ्यस्ताच्छतुः अभ्यस्ताच्छतुर्नुमत्र ददत्‌ ददतौ जक्षित्यादयः षट्‌ धातवोन्ये जक्षितिश्चसप्तममपते भ्यस्तसंज्ञाः
स्युः जक्षत् जक्षतौ एवं जाग्रत्‌ दरिद्रत्‌ शासत्‌ चकासत्‌ दीध्यत्‌ वेव्यत्‌ गुप् गुब् गुपौ गुब्भ्यां त्यदादिषु दृशेष्टला
लोचते कञ्चत्यादाविषूपपदेषु अज्ञानार्था दृशेः कञ् चात्किन्‌ आसर्वनाम्नः दृग्दृशावतुषु सूर्वनाम्नः आकारोंता
देशः स्यात्‌ दृग्दृशावतुषुपरेषु ताद्दृक्‌ तादृग् तादृशौ तादृग्भ्यां तादृक्षु श्रजेतिषः जश्‌ त्वचर्त्वे विट्‌ विड्‌ विशौ
विड्भ्यां विट्‌सु विट्त्सु नशोर्वा नशेः कवर्गादेशो वा पदांते नक्‌ नग्‌ नट्‌ नड्‌ नग्भ्यां नड्भ्यां ऋत्वात्‌ पूर्वे
क्विन् ङः गः कः प्राधड्‌ गाक् नट्‌सु नट्त्सु स्पृशो वदकेक्विन्‌ अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्‌ घृतस्पृक्‌ घृ
तस्पृग्‌ घृतस्पृशौ घृतस्पृग्भ्यां घृतस्पृक्षु दधृक्‌ दधृग्‌ दधृग्भ्यां दधृक्षु रत्नमुट्‌ रत्नमुषौ रत्नमुषः रत्नमुड्भ्यां
रत्नमुट्सु रत्नमुट्त्सु षट्‌ २ षड्भिः षड्भ्यः २ षण्णां षट्‌सु षट्त्सु हृत्वप्रतिषेधस्यासिद्धत्वान्न सम्प्रत्ययो हरितिस
ने वोरुपधाया दीर्घ इकः रेफवान्तस्योपधाया इको दीर्घः पदांते पिपठीः पिपठिषौ पिपठीर्भ्यां नुम्
विसर्जनीयशर्ष्वा वायेपि पते: प्रत्येकं यथाने पीणा ऊभ्यां पदस्य समस्य मूर्द्धन्यादेशः षत्वेन पूर्वस्य घत्वं पीपु
ठीषु पिपठीःषु चिकिः चिकीर्षौ चिकीर्षु विद्वान्‌ विद्वांसौ विद्वांसः हे विद्वन् वसोः संप्रसारणं वस्
नस्य भस्य संप्रसारणं स्यात्‌ विदुषः वसुस्रंसिध्वंसुतिदः विद्वद्भ्यां पुंसोः स्त्रुङ् सर्वनामस्थाने पुमान्‌ हे पुमन् पुं
मांसौ पुंसः पुंभ्यां पुंसु अडुर्धाने त्वनडुह् उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशनन् ॥

ऊं· हे उशनन् हे उशनः उशनोभ्यां अनेहा अनेहसौ हे अनेहः वेधाः वेधसौ हे वेधः वेधोभ्यां अदस् औ सुलोपश्च अ
दस औ त्स्यात् सौ सुलोपश्च तदोः सः सावनन्त्ययोः असौ औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः प्रतिषेधपक्षे सादुत्वंच
असकौ असुकः अदसोऽसेर्दादु दो मः अदसो दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्यात् ह्रस्वस्य ह्रस्वः दीर्घ ऊदी।
र्घस्य ऊः अमू जसः शीः गुणः एतईद्बहुवचने अदसो दात्परस्य एत ईत् स्यात् बहुर्थोक्तौ अमी पूर्वत्रासिद्धमिति वि-
भक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुं अमू अमून् मुत्वे कृते घिसंज्ञायां नाभावः न मु ने नाभावे कृते यत्वं कृतेच
मुभावो नासिद्धः अमुना अमूभ्यां अमीभिः अमुष्मै अमीभ्यः अमुष्मात् अमुष्य अमुयोः अमीषां अमुष्मिन्
अमीषु ॥ इति हलन्ताः पुंल्लिंगाः ॥ ॐ ॥ नहो धः नहो हकारस्य धः स्यात् झलि पदान्तेच नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ क्विबन्तेषु पूर्वपदस्य दीर्घः उपानत् उपानहौ उपानहः उपानद्भ्यां उपानत्सु
उष्णिक् उष्णिहौ उष्णिग्भ्यां द्यौः दिवौ द्युभ्यां गीः गिरौ गिरः गीर्भ्यां गीर्षु एवं पूः पुरौ पूर्भ्यां चतस्रः चतसृणां का।
के काः सर्ववत् यः सा इदमो मः त्यदाद्यत्वं पररूपत्वं टाप् दश्च इति मः इमे इमाः इमां
इमे इमाः अनया हलि लोपः आभ्यां आभिः अस्यै अस्याः अनयोः आसां अस्यां अनयोः आसु स्रक् स्रजौ
स्रजः स्रग्भ्यां त्यदाद्यत्वं टाप् स्या स्ये स्याः वाक् वाचौ वाग्भ्यां अप्शब्दो नित्यं बहुवचनान्तः अप्तृन्निति दीर्घः
आपः अपः अपोभि अपस्तकारो भादौ अद्भिः अद्भ्यः अपां दिक् दिशौ दिशः दिग्भ्यां त्यदादिष्विति दृशेः
क्विन्विधानात् दृशेरपि कुत्वं दृक् दृशौ दृग्भ्यां त्विट् त्विषौ त्विड्भ्यां ससजुषोरुरिति रुत्वं सजूः सजुषौ सजू
र्भ्यां आशीः आशिषौ आशीर्भ्यां असौ उत्वमत्वे अमू अमूः अमुं अमू अमूः अमुया अमूभ्यां ३ अमूभिः अमुष्यै अमूभ्यः २
अमुष्याः अमुयोः २ अमूषां अमुष्यां अमुयोः अमूषु इति हलन्ताः स्त्रीलिंगाः स्वमोर्लुक् स्वमसंख्यस्य नपुंसकात् इति दस्

ॐ ल. कौ. ११ ॥

स्वनडुत् स्वनडुही चतुरनडुहोरित्याम् स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि वाः वार्भ्यां चत्वारि किं के
कानि इदं इमे इमानि ब्रह्म सम्बुद्धौ नपुंसकानां नलोपो वा वक्तव्यः हे ब्रह्म हे ब्रह्मन् ब्रह्मणी ब्रह्माणि रोऽसुपि
अहः विभाषा ङिश्योः अह्नी अहनी अहानि अहन् अहन्नित्यस्य रुः स्यात्पदान्ते अहोभ्यां दण्डि दण्डिनी दण्डीनि सुप दंडि १
थि टिलोपः सुपथी सुपन्थानि ऊर्क् ऊर्जी ऊर्न्जि नरजानां संयोगः त्यद् त्ये त्यानि तत् ते तानि यत् ये यानि एतत् एते
एतानि गवाक् गोची गवाञ्चि पुनस्तद्वत् गोचा गवाग्भ्यां शकृत् शकृती शकृन्ति शकृद्भ्यां ददत् ददती वा न
पुंसकस्य अभ्यस्तात् क्लीबात् परस्य शतुर्वा नुम् सर्वनामस्थाने ददंति ददति तुदत् आच्छीनद्योर्नुम् अवर्णान्त
रोयः शतुरवयवस्तदन्तांगस्य नुम् वा शीनद्योः तुदन्ती तुदती तुदन्ति भात् भान्ती भाती भान्ति पचत् शप्श्यनो
र्नित्यं शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नुम् शीनद्योः पचन्ति दीव्यत् दीव्यन्ती दीव्यन्ति धनुः धनुषी
सान्तेति दीर्घः नुम् विसर्जनीयेति षः धनूंषि धनुषा धनुर्भ्यां एवं चक्षुर्हविरादयः पयः पयसी पयांसि पय
सा पयोभ्यां सुपुम् सुपुंसी सुपुमांसि अदः विभक्तिकार्यं उत्वमत्वे अमु अमूनि शेषं पुंवत् इति हलन्ताः
क्लीबाः स्वरादिनिपातमव्ययम् स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः स्वर् अंतर् प्रातर् सनुतर् उच्चैस्
शनैस् ऋधक् ऋते युगपत् आरात् पृथक् ह्यस् श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं बहि
स् अवस् समया निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सामिवत् ब्राह्मणवत् क्षत्रियवत् सना स
नत् सनात् तिरस् अंतरा अंतरेण ज्योक् कं शं सहसा विना नाना स्वस्ति स्वधा अलं वषट् श्रौषट् वौषट् अ
न्यत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकं ॥
प्रवाहिका आर्यहलं अभीक्ष्णं साकं सार्धं नमस् हिरुक् धिक् अथ अम् आम् प्रताम् प्रशान् प्रमान् ॥

माभाङ् आकृतिगणोऽयं च स्वाहा अह एव एवं नूनं शश्वत् युगपत् भूयस् सूपत् कुवित् नेत्
चेत् चण् यत्र कच्चित् नह हन्त माकिः नकिः माकीं माङ् नञ् यावत् तावत् त्वै द्वै रै श्रौषट् स्वाहा
स्वधा वषट् तम् तथाहि खलु किल अथ सुष्ठु स्म आदह उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं
अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ए ऐ ओ औ पशु शुकं यथा कथा च पाट् प्याट् अंग है हे भोः अये य विष्व
नाकृ एकपदे युत् आतः चादिरप्याकृतिगणः तद्धितश्चासर्वविभक्तिः यस्मात्सर्वा विभक्तिर्नोत्पद्यते
स तद्धितान्तोऽव्ययं स्यात् परिगणनं कर्तव्यं तसिलादयः प्राक्पाशपः शस् प्रभृतयः प्राक् समासा ।
न्तेभ्यः अम् आम् कृत्वोऽर्थाः तसिवती नाना ञाविति अ नः इत्यादि कृन्मेजन्तः कृद्यो मान्त एजन्तश्च त
दन्तमव्ययं स्मारंस्मारं जीवसे पिबध्यै क्त्वातो सुन्कसुनः एतदन्तमव्ययं कृत्वा उदेतोः विसृपः
अव्ययीभावश्च अधिहरि अव्ययादाप्सुपः अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात् तत्र शालायां ॥
अथ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं व ष्टिभागुरिरल्लो
पमवाप्योरुपसर्गयोः टापं चैव हलन्तानां यथा वाचा निशा दिशा वगाहः अवगाहः पिधानं ॥
अपिधानं ॥ इत्यव्ययानि ॥ ❋ ॥ ❋ ॥ ❋ ॥ इति श्रीमद्वरदराजविरचितायां लघुसि
द्धांतकौमुद्यां अव्ययपौर्वार्द्धः समाप्तः ॥ ❋ ॥ ❋ ॥ ॥ ❋ ॥ ❋ ॥ ❋ ॥

लघुकौमुदी पत्र १२

ल॰ ॥लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो लकारश्छंदोमात्रगोचरः धातोरित्यधि
कौ॰ कृत्य लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः अकर्मकेभ्यो भावे
१२ कर्तरि च वर्तमाने लट् वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् अटाविता उच्चारणसामर्थ्यात् लस्येतत्वं भूसत्ता
१८ यां कर्तृविवक्षायां भू ल इति स्थिते तिप् तस् झि सिप् थस् थ मिप् वस् मस् ता आतां झ थास् आथां ध्वम् इड् वहि महिङ्
एतेऽष्टादश लादेशाः स्युः लः परस्मैपदं लादेशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ् प्रत्याहारः शा
नच् कानचौ चैतत्संज्ञाः स्युः पूर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित् तदंताच्च धा
तोर्लः स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञितश्च धातोरात्मनेपदं कर्तृ
गामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्री
णि त्रीणि प्रथममध्यमोत्तमाः तिङ् उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवच
नबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानि तिङ्स्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः युष्मद्यु
पपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च
मध्यमः अस्मद्युत्तमः तथाभूतेऽस्मद्युत्तमः शेषे प्रथमः भू ति इति जाते तिङ् शित्सार्वधातुकं तिङः शितश्च
धात्वधिकारोक्ता एतत्संज्ञाः स्युः कर्तरि शप् कर्त्रर्थे सार्वधातुके परे धातोः शप् शपावितौ सार्वधातुका
र्द्धधातुकयोः अनयोः परयोरिगंतांगस्य गुणः अवादेशः भवति भवतः झोंतः प्रत्ययावयवस्य झस्यांतादे
शः अतो गुणे भवंति भवसि भवथः भवथ अतो दीर्घो यञि अतोंगस्य दीर्घो यञादौ सार्वधातुके भवामि
भवावः भवामः स भवति तौ भवतः ते भवंति त्वं भवसि युवां भवथः यूयं भवथ अहं भवामि आवां भवावः॥